M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 51

Title: Vapikupatadagokhata-dyapana vidhi

Smṛtikaustubha

		Vāpīkūpataḍāgokhātodyāpa-	Title
		-na vidhi	Author
			Editor
			Year, Vols.
			Publisher
51			Remarks

51

कूं० शां० १ ॥श्रीगणेशाय नमः॥ ॥अथ वापीकूपतडागखातोद्यापनविधिः प्रयोगः॥ तत्र यजमा-
नः॥ ॥शुभे मुहूर्त्ते कृतनित्यंगशुचिर्भूत्वा प्राणानायम्य देशकालौ संकीर्त्य मम सकुटुंबा-
नां क्षेमस्थैर्यआयुरारोग्यपुत्रपौत्राभिवृध्यर्थं सर्वपापक्षयार्थं जलाशयोद्यापनेद्वा-
रा एकविंशतिपुरुषानात्मनसहोद्धर्तुं श्रीपरमेश्वरप्रीत्यर्थं वापीकूपतडागखातादि-
अमुकोद्यापनं करिष्ये इति संकल्प्य॥ तदंगत्वेन गणपतिपूजनं स्वस्तिपुण्याहवाचनं
मातृकापूजनं नांदीश्राद्धं नवग्रहमखपूर्वकं आचार्यब्रह्मऋत्विग्वरणमहं करिष्ये॥
तत्रादौ निर्विघ्नतासिध्यर्थं गणपतिपूजनं करिष्ये॥ गणानां त्वेति मंत्रेण षोडशोप- रामः
चारैः पूजयेत्॥ गणेशपूजनादि नांदीश्राद्धांतं कृत्वा॥ ततआचार्यादिवरणं॥ ॥आ- १
चार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः॥ तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्र-
तः॥ ॥अथ ब्रह्मवरणं॥ यथा चतुर्मुखो ब्रह्मा स्वर्गे लोके पितामहः॥ तथा त्वं मम

यज्ञेस्मिन्ब्रह्माणं त्वामहं वृणे॥ अथ ऋत्विजः षोडश अष्टौ चत्वारो वा वृणुयात्॥
अस्य यागस्य निष्पत्तौ भवंतोभ्यर्थिता मया॥ सुप्रसन्नैः प्रकर्त्तव्यं शांतिकं विधिपूर्वकं
॥ यथाशास्त्रं वेदक्रमेण मधुपर्कादि पूजां विधाय॥ ततआचार्य आचम्य यागभूमिं
सर्वतोसर्षपान्विकिरेत्॥ तत्र मंत्राः॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा॥
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥ अपक्रामंतु भूतानि०॥ अपसर्पंतु ये
भूता०॥ इति मंत्रेणादि विकिर्य्य अंतरिक्षभूतान्युत्सार्य॥ शुचीवो हव्येति त्र्यृचेन पंच-
गव्येन आपोहिष्ठेति त्र्यृचेन शुद्धोदकेन च यागभूमिं प्रोक्ष्य॥ कूपपश्चिमे स्थंडि-
लपश्चिमतः प्राङ्मुखोपविश्य विधिवदग्निं प्रतिष्ठाप्य॥ चत्वारिशृंगेति ध्यात्वा
वरुणादिदेवताः आवाहनाद्युपचारैः पूजयेत्॥ तत्रायं क्रमः॥ अग्नेरीशानभा-
गे समंत्रकं कलशं प्रतिष्ठाप्य तदुपरि वंशपात्रं समंत्रकं निधाय तत्र उदकस्य

कृं०ग्रां० स्वं वरुणं १ गंगां २ गोतमीं ३ भीमां ४ कृष्णां ५ वेण्यां ६ सरस्वतीं ७ यमुनां ८ नर्मदां ९ मं
२ डूकं १० मत्स्य ११ कूर्म १२ मकरं १३ सर्प १४ दुंदुभ १४ कर्कटिनां १५ स्वर्णादिधातुनि
र्मितु निर्मित प्रतिमानां अग्न्युत्तरतः पूर्वकैर्नाममंत्रैरावाहनाद्युपचारैरभ्यर्चेत
दुत्तरतो ग्रहप्रतिष्ठां पूजां कृत्वा॥ तदुत्तरतो वर्द्धनीकलशं संस्थाप्य तत्र वरुणमावा
ह्याभ्यर्च्य॥ अग्नेः पश्चिमतः उपविश्यान्वाधानं कुर्यात्॥ तद्यथा॥ देस्यमिधोग्रही
त्वा अस्मिन्कूपोद्यापनाख्ये कर्मणि देवतापरिग्रहार्थमन्वाधानं करिष्ये॥ अस्मि
न्नन्वाहितेग्नौ विद्यादि चक्षुषी आज्येनेत्यंतन्त्वा अत्र प्रधानं॥ आदित्यं सोमं भौमं रामः
बुधं बृहस्पतिं शुक्रं शनैश्चरं राहुं केतुं एताः प्रधानदेवताः अष्टाष्ट संख्याभिः॥ २
अर्कादिसमिच्चरुघृताहुतिभिः॥ ईश्वरं उमां स्कंदं नारायणं ब्रह्मा
णं इंद्रं यमं कालं चित्रगुप्तं अग्निं अपः भूमिं विष्णुं इंद्रं इंद्राणीं प्रजापतिं सर्पान्

ब्रह्माणं एताः अधिदेवताः प्रत्यधिदेवताः प्रत्येकं चतुश्चतुः संख्याभिः अर्कादिस
मिच्चरुघृताहुतिभिः विनायकं दुर्गां वायुं आकाशं अश्विनौ वास्तोष्प
तिं क्षेत्रपालं इंद्रं अग्निं यमं निरृतिं वरुणं वायुं कुबेरं ईशानं एताः क्रतुसंरक्षदेव
ता तथा लोकपालदेवताश्च प्रत्येकं उक्तद्रव्यं एकैकयाहुत्या पुनः प्रधानं वरुणं
गंगां गोतमीं भीमां कृष्णां वेण्यां सरस्वतीं यमुनां नर्मदां मंडूकान् मत्स्यान् कूर्मं मक
रं शुशुमारं दुंदुभान् कर्कटिकान् प्रत्येकं अष्टाष्ट संख्यया पायसाहुतिभिः अपः
सवितारं रुद्रं गणपतिं दुर्गां इंद्रं अग्निं ईशानं एताः प्रधानदेवताः नाममंत्रेण प्रत्ये
कं एकैकयाहुत्या समिच्चरुतिलाज्यद्रव्येण अपः पंचविंशतिवारं शतिवारं आ
ज्येन पुनः अपः प्रसुवे आप इति सूक्तेन प्रत्यृचं एकैकयाहुत्या नव संख्याभिः दधिस
क्तुद्रव्येण तथा अपः नव संख्याभिः अंबयो यंति सूक्तेन प्रत्यृचं एकैकयाघृतेन

कलशाहुतिभिः वरुणं एकत्रिंशद्वारं आज्येन तथा वरुणं अष्टसंख्याभिः चरुद्रव्येण।
कुं० श्रौ० शेषेण स्विष्टकृतमित्यादि स्वयोपस्थरस्वंतमुक्त्वा परिसमूहनादि चरुकर्म तं कृत्वा
३ प्रधानहोमं कुर्यात्॥ ॥हवनीयद्रव्यत्यागे कृत्वा॥ इदं उपकल्पितद्रव्यं यथादैवत
मस्तु तस्यै तस्यै देवतायै इदं हविः न मम॥ ॥तत्त्वा यामीति मंत्रस्य शुनःशेप ऋ
षिः वरुणो देवता अनुष्टुप् छंदः प्रधानपायसहोमे वि० ॐ तत्त्वा यामि ब्रह्मणा० वं
स्वाहा इति मंत्रेण अवदानधर्मेण जुहुयात्॥ गंगाद्यानाम मंत्रेण अष्टाष्टपायसेन राम:
जुहुयात्॥ अंबादि अष्टदेवता अन्वाधानोक्तसंख्यया उक्तद्रव्ये जुहुयात्॥ ॥अथ ३
सूक्तहोमः॥ आपो हि ष्ठेति नवर्चस्य सूक्तस्य० प्रधानाज्यहोमे वि० ॐ आपो हि ष्ठा० १ यो
वः शिव० २ तस्मा अर० ३ शं नो दे० ४ ईशाना० ५ अप्सु मे० ६ आपः पृ० ७ इदमा० ८ आपो०
८ आपो अ० ९ आपो अस्मानिति पंचर्चस्य सूक्तस्य देवश्रवा आपस्त्रिष्टुप् प्रधाना

ज्यहोमे वि० ॐ आपो अस्मान्मा० द्रप्सश्चस्कंद० २ यस्ते द्रप्सस्कंदति० ३ यस्ते द्रप्सस्कंनो
यस्ते अंशुः० ४ पयस्वती ओषधयः० ५ समुद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य वामदेव
ऋषिः आपो देवता त्रिष्टुप् छंदः अंत्या जगती प्रधानाज्यहोमे वि०॥ ॐ समुद्रादूर्मिर्म
धु० १ वयं नाम० २ चत्वारि शृंगा० ३ त्रिधा हितं० ४ एता अर्षंति हृद्या० ५ सम्यक्स्रवं०
६ सिंधोरिव प्रा० ७ अभिप्रवंत० ८ कन्या इव० ९ अभ्यर्षत० १० धामं ते विश्वं० ११॥
प्रसुव आप इति नवर्चस्य सूक्तस्य सिंधुक्षित्प्रैयमेधो नद्यो जगती॥ प्रधानदधिसक्तु
होमे० ॐ प्रसुव आपो० १ प्र ते रदद्वरुणो० २ दिवि स्वनो० ३ अभि त्वा सिंधो० ४ इमं मे गंगे
० ५ तृष्टामया० ६ ऋजीत्येनी० ७ स्वश्वा सिंधुः० ८ सुखं रथं युयुजे० ९॥ अंबयो यंतीत्य
स्य नवर्चस्य सूक्तस्य शुनःशेप ऋषिः आपो देवता गायत्री छंदः प्रधानघृताक्त
ओदनहोमे वि०॥ ॐ अंबयो यंत्य० १ अमूर्या उप० २ अपो देवी० ३ अप्स्वंतर० ४ अप्सु मे० श्च१

आवः द्दणी० ६ इदमापः० ७ आपो अद्य० ८ सं माग्ने व० ९॥ नहि ते क्षत्रमित्येकत्रिंशदृच
कुं० शौ० स्यस्य सूक्तस्य शुनःशेप ऋषिः वरुणो देवता गायत्री छंदः॥ प्रधानाज्यहोमे०॥ ॐ नहि
४ ते क्षत्रं० १ अबुध्ने० २ उरुं हि० ३ शतं ते रा० ४ अमी य ऋ० ५ तत्त्वा यामि० ६ तदिन्न
क्तं० ७ शुनःशेपो ह्य० ८ अव ते हे० ९ उदुत्तमं व० १० यच्चिद्धि ते वि० ११ मा नो वधा० १२
विमृळीका० १३ परा हि मे० १४ कदा क्षत्र० १५ तदित्स० १६ वेदा यो० १७ वेद मा० १८ वे
द वात० १९ नि षसाद २० अतो विश्वा० २१ स नो विश्वाहा० २२ बिभ्रद्द्रापिं० २३ न यं राम:
दिप्संति० २४ उत यो मा० २५ परा मे यंति० २६ सं नु वोचा० २७ दर्शं नु वि० २८ इमं मे ४
वरुणा० २९ त्वं विश्वस्य मे० ३० उदुत्तमं मुमु० ३१॥ प्र सम्राज इत्यष्टर्चस्य सूक्तस्य अ
त्रि ऋषिः वरुणो देवता त्रिष्टुप् छंदः प्रधानचरुहोमे वि०॥ ॐ प्र सम्राजे बृह० १ वने
षु व्यं० २ नीचीनबारं० ३ उनत्ति भू० ४ इमामू षु आ० ५ इमामू नु० ६ अर्यम्यं व० ७॥

ते इष्टे ते ग्रहमखादिस्थले माषभक्तबलिदानादिपूर्णाहुतिः ततः प्रणीतानिनयनसंस्थाजपप
रिस्तरणविसर्जनपरिसमूहनादि ततः स्थापितकलशोदकेन कदेशेनाचार्यो दूर्वापल्लवै
रुदङ्मुखस्तिष्ठन् सन्बान्धवस्य प्राङ्मुखस्य यजमानस्याभिषेकं कुर्यात् समुद्रज्येष्ठा इत्यादि
भि भिरेभिर्मंत्रैः पत्नी वामत उपविशेत्॥ ततो धृतश्वेतवस्त्राणां सर्वेषां श्वेतचंदनपुष्पमालाभि
राचार्येणार्चनं कुर्यात्॥ सह यजमानबांधवास्तडागं प्रदक्षिणीकृत्याग्नेः परितो आज्यधारां
कुर्वंतोऽग्निं प्रदक्षिणीकुर्युः॥ मा नस्तोक इति विसृष्टिधारणं कुर्युः॥ ततः स्थापितकुंभात् कूर्मा
दिरूप्याण्युद्धृत्य तडागमध्ये आचार्यो यजमानकुंभं निदध्यात्॥ तथा वापीकूपादावपि तथा
स्मै तडागाय स्वस्ति भवंतो ब्रुवंत्विति ब्राह्मणान्वाचयेत्॥ ते चास्मै तडागाय स्वस्तीति व
देयुः॥ ततः पश्चिमतीरस्थवत्सतरीं इषुवाराशांत यथाशक्ति ब्राह्मणान् भोजयित्वा॥ यथाश
क्ति तेभ्यो दक्षिणां दत्त्वा॥ उत्तरपूजनं पूर्ववत्कृत्वा विसर्जनांते आचार्याय निवेदनं कृत्वा॥ जलमध्येन
पश्चिमतीरमारभ्यापेशानदिक्पर्यंतं पुच्छं चिणान्वारब्धा गां नयेत्॥ इमां धियमिमाम कृ

ऋषिः वरुणो देवता ॥ त्रिष्टुप् छंदः ॥ इमां धियं शिक्ष० ॥ अवतीर्यमाणामनुमंत्रयेत ॥ इदं सलिलं
पवित्रं कुरुष्व शुद्धाः पूता अमृताः संतु ॥ नियमां तारयंति कुतीर्थामिषिकं ॥ कौ लो द्वेत्र कंतरने
तार्यनि चेति आपो अस्मान् मातरः शुंधयंतु ॥ जित्यु तीर्यस्वरथ वसात् गबती हिन्न्या इति गां ऐशान्यां दि
५ शि स्थापयेत् ॥ यदि गौ हिं कुर्यात् ॥ हिंकृण्वती वसुपत्नी वसूनां इत्यनुमंत्रयेत् ॥ ततो वैस्त्र
वेष्टितकं ॐ हेमशृंगीं रौप्यखुरीं ताम्रपृष्ठीं कांस्यदोहां वृषभयुक्तां गां आचार्याय दद्यात्
॥ यज्ञसाधनभूताया विश्वस्याघप्रणाशिनी ॥ विश्वरूपधरो देवः प्रीयतामनया गवेति ॥
ततो यजमानः सतिलकुशोदकमंजलावादाय उत्सर्गं कुर्यात् ॥ एतत्तडागादिकं जलं रामः
अमुकगोत्रो अमुष्य प्रपौत्रः अमुष्य पौत्रः अमुष्य पुत्रः ॥ असौ अहं परमेश्वरः प्रीतिका ५
मोनानानामभूतेभ्यः साधारणमुत्सृजामि देवपितृमनुष्याः प्रीयंतामिति आचार्योपि
देवपितृमनुष्याः प्रीयंतामिति वदेत् ॥ ततो यजमानः सर्वभूतेभ्यः उत्सृष्टं मयैतज्जलम्
जितिस्येवं तास्वभूतानि दानपानावगाहनैः ॥ सामान्यं सर्वभूतेभ्यो मया दत्तमिदं जलं
॥१॥

धर्मार्थकाममोक्षेषु साधनं स्यद्दहर्निशं ॥ ततो जलांतिकदेशाद्गोः पश्चिमदेशमागत्य त
त्रोपविश्य स्वर्णरजतरूपां अर्घ्यो वा मध्यस्थी दक्षिणां दत्वा ॥ ब्राह्मणेभ्यो दत्वाशिष्यित्वतः
संतुष्य विष्णुं स्मृत्वा ॥ भगवद्दर्शनं कुर्यात् ॥ ॥ इस नंतदेविये स्मृतिकौस्तुभे शौन
कोक्तस्तडागादिप्रतिष्ठाविधिः समाप्तः ॥ ॥ श्रीरामचंद्रार्पणमस्तु ॥ ॥ ७ ॥